M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. Ser. 952

Title: Anavadya Nirnaya

952

Complete

C

Amavasya Nirnaya		: Title
		: Author
श्राद्ध - a work on.		: Editor
[illegible]		: Year, Vols.
		: Publisher
952		: Remarks

दिनद्वये संपूर्णापराह्णव्याप्ते द्वयोरेकनियंतत्वेन तत्र क्षयासंभवात् तत्र क्षयोदाहरणं यदा प्रतिपद् दशादशघटिका द्वितीया चतुर्विं
शतिघटिका तृतीयाद्या विंशतिघटिका तदा द्वितीयाश्राद्धं प्रतिपदि कार्यं वृद्ध्युदाहरणं यदा प्रतिपद् द्वितीये यथास्थि
ते तृतीयाद्या षड्विंशतिघटिका तदा द्वितीयायां तत् अत्रेदं भयोदाहरणं ज्योतिःशास्त्रप्रसिद्धाद्याविदेवं
संभाव्यते वृद्धिक्षयो पूर्वतिथ्यपेक्षया ग्राह्यतिथिगतो ग्राह्यो इति तत्र दिनद्वये अपराह्णव्याप्त्यभावे तु पूर्वेण द्वयोरप्यव्यापिनी चे
स्यान्मतान्तरस्य तु याति तिथिः पूर्वविद्धैव कर्तव्या त्रिमुहूर्ताभवेद्यदि दर्शे च पूर्णमासे च पितुः सांवत्सरे दिने पूर्वविद्धमकुर्वाणो नरक
प्रतिपद्यते इति मरीचिवचनात् सायाह्नरूपगौणकालेस्य वाध्य नव सायाह्ने त्रिमुहूर्तः स्यात् श्राद्धं तत्र न कारयेत् इति निषेधाद
यद्धियोभमावदको अपाकः केवल इति विधिवर्जनवत् गौणकालत्वमितिवाच्यं उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ तथा य
स्यामस्तं रविर्याति पितरस्तामुपासते तथास्तमयवेलायां कलामात्रापि या तिथिः सैव प्रत्याब्दिके श्राद्धे नेतरा पुत्रहानिदेति विष्णु
धर्मोत्तरमनुव्यासादिवचनैः प्रतिप्रसवात् गौणकाल एव अतएव स्वकालातिक्रमे कुर्यात् रात्रेः पूर्वं यथाविधी सर्वाधिमासे संक्र
संगच्छते तिथिमध्यस्यापि पूर्वदिने सत्वात् पूर्वं च तत्प्राशस्त्यं शिवरहस्य सौरपुराणयोः प्रायः श्रांते उपेरव्याप्ति तिथिर्दैवफले प्रसु
सिः मत्स्यंहि पितृतत्स्यर्थपैत्र्यं प्रोक्तं महर्षिभिः इति विशेषतिथ्योर्निर्णीताः अथेष्टिकालः आवर्तनात् पूर्वो मध्याह्नापराह्णः
स्ततः परः मध्याह्नस्तुतयोः संधिर्यदावर्तेन मुच्यते तत्कापिलकमेव यौगिकमर्थमनुवदति न तु पूर्वापरिभाषां विधत्ते येन
त्रिमुहूर्तवाक्यमपि द्वेधा विभक्तदिनापरभागरूपमपराह्णमुपजीवेत् अतो दिनमध्ये यदा कदाचित्संधौ परादिने पंचधा विभक्त
दिनचतुर्थभागरूपसकलापराह्णव्यापि द्वितीयासत्वे चतुर्दश्या ठ वाधानं संधिदिने च याग एष एवानिर्णयामृतमदनपा

द्वितयायाशयायाकष्येत

४

अथ स्वमातामह्यादिपार्वणेन सह श्राद्धे षड्दैवत्यं तत्राप्यापाद्यजीवने परलोपात्तत्पार्वणलोप एव मृतश्वश्र्वादे तु श्वश्र्वादि

एतत्त्रयं अपुत्रविषयं युक्तमिति पितृचरणाः यत्तु स्मृतिसंग्रहे चत्वारः पार्वणाः प्रोक्ता विधवायाः सदैव हि स्वभर्तृश्वशुरादीनां

मातापित्रोस्तथैव च ततो मातामहानां च श्राद्धं नमुपक्रमेत् पूर्णानां विशेषण मातामह्यास्तथैव च एतन्मूलं श्वश्र्वादि

मात्रादिपार्वणयोरकरणे भर्तृपितृपार्वणयोरेव यथायोग्यं सपत्नीनामिति वाच्यं अन्यथा तु यथासंभवमेकोद्दिष्टानीति

यत्तु भर्तृश्राद्धं तु या नारी मोहात्पार्वणमाचरेत् न तेन तृप्येत् भर्ता कृत्वा च नरकं व्रजेत् इति वचनं तत्क्षयाहे एकोद्दिष्टप्रशंसार्थं

न तु सर्वथा पार्वणप्रतिषेधार्थमिति दिक् नित्यस्य चाब्दिकस्यापि दार्शिकाब्दिकयोरपि युगाद्याब्दिकयोः श्राद्धमन्वाद्याब्दिकयोरपि प्रस

ब्दिकेषु कालस्य योगेषु विहितस्य च संपाते देवताभेदात् श्राद्धयुग्मं समाचरेत् दर्शादिषु सपत्नीकदेवताः पितरः उदकुंभमासिकाब्दिकेषु

अपत्नीका इति देवताभेदः मृतेऽह्नि समासेन पिंडनिर्वपणं पृथक् नवश्राद्धं तु दंपत्योरन्वारोहणे एव तु पित्रोः श्राद्धं समं प्रोक्तं नवे

पूर्युषिते पिवा पितृकृत्यं कुर्यादन्यत्रासाहित्ययोगतः पर्युषिते निवर्तते अन्यत्र समस्तस्थिते व्यतिरिक्तनिश्चये नारायणः

अभोज्यान्नं ब्राह्मणस्यान्नं क्षत्रियस्य चौनिर्मंत्रित तथैव क्षत्रियस्यान्नं वृषलेन निमंत्रितं अभोज्यान्नं ब्राह्मणस्यान्नं वृषलेनानि

मंत्रितं तथैव वृषलस्यान्नं ब्राह्मणेन निमंत्रितं भृगुः आमंत्रितो जपं दोग्ध्री आसीनस्तु निषंगिणः अमासोमसमायोगे श्राद्धं प्रेत्य

लभ्यते तीर्थे कपिलधारेस्मिन् गयायां पुष्करे जले किं दिव्यंतरिक्षभौमानि यानि तीर्थानि सर्वशः तान्यत्र निवसंति व्यंति दर्शे सोमदिनान्विते

मासेन भस्य मावास्यादर्शेष्य हणमिष्यते अपात तयामा स्ते दर्शा विनियोगे पुनः पुनः वह्निः कृतः अमायां श्रवणार्कयोगे व्यतीपातः श्रवणा

श्विपाणिश्चाद्गीनागदेवतामस्तके अमाचेद्रविवारेण व्यतीपातः स उच्यते तत्र जप्तं हुतं दत्तं सर्वं कोटिगुणं भवेत् नागदेवतमार्क्षेषा मत्स्यः

पवि अमावास्या तु सोमेन सप्तमी भानुना तथा चतुर्थी भौमेन पुत्रेण सोमपुत्रेण चाष्टमी चतस्रस्तिथयस्त्वेताः सूर्यग्रहणसंनिभाः

स्नानं श्राद्धं तथा दानं सर्वं तत्राक्षयं भवेत् अमावास्यायां विष्णुपुत्रेण युक्तायां शिवपूजनं सर्वपापहरं स्मृतम् ॥ ॥

श्राद्धविषये दृष्ट्वा तु श्राद्धं तु रजोदर्शनात्पंचमदिने कार्यं मृतेऽहनि तु संप्राप्ते भार्या यस्य रजस्वला श्राद्धं तत्र न कर्तव्यं कर्तव्यं पंचमेऽहनि गौतमः

समसंतराद्धे हेमाद्रिः पत्नी भर्तुर्धनहरी पत्नी दुहितरश्चैव असंबद्धाश्च पितृः परस्पः पत्न्यधिकारिके पुत्र तत्पितृमातृभ्रात्रादिदिवसेषु तस्या

अनधिकारः प्रतिसंवत्सरे कार्यं मातापित्रोर्मृतेऽहनि पितृव्यस्य स्वस्य पुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हि इति स संबंधिकपितृमात्रादि गर्भपर

देवीपुराणवचनस्तां तां प्रत्यप्रवृत्ते आधिकाराभावत् ज्ञातं साहित्ये कालादर्शे अपुत्रा तु यदा भार्या संप्राप्ते भर्तुराब्दिके रजस्वला भवेत्त

तु कुर्यात्तत्पंचमेऽहनि गौ तम मृतश्राद्धाधिकारिणी प्रतिप्रतिजन्तो यस्य कर्त्री भार्येति वाच्यम् माधवस्तु भर्तृकृत्यमपि लिखेल नतु

किंचिल्लिखितनियतकाले पुष्पवत्स्वपि दारेषु विदेशस्थोऽप्यनग्निकः अन्नेनैवाब्दिकं कुर्याद्धेम्ना वामेन नक्वचित् विदेशगो वा विगता

ग्निको वा रजस्वलायामपि धर्मपत्न्यां श्राद्धं समनाहे विदधीत पाके नामेन हेम्नान तु पंचमाह्नि तदपि रजस्वलायां धर्मपत्न्यां सत्यां श्राद्धं

नामेन हेम्ना न पंचमेऽह्नि तु पाके विदधीतेत्येवं व्याख्येयं यत्तु पापि जातादे मासिकानि सपिंडानि अमावास्या तथाब्दिकं अन्नेनैव

तु कर्तव्यं यस्य भार्या रजस्वलेति तदप्यामहेमपरिसंख्यामात्रार्थमिति सर्वं शिवं कालः योगभाष्यवक्यः उदयात्प्राक्तनी संध्या

मुहूर्तद्वयमुच्यते सायंसंध्या त्रिघटिका ह्यस्ताद्उपरि भास्वतः बृहन्नारदीयः युगादिषु मघायां च विषुवेष्वयने तथा भरणीषु च कर्तव्यं

पिंडनिर्वपणं नहि विवाहे विहिते मासान् सजेयुर्वर्षे शेव हि सपिंडाः पिंडनिर्वापे मो जीवं धेपदेवा हि क्वचित् प्रतिप्रसवमप्याह महालयेग

याश्राद्धे मातापित्रोः क्षयेऽहनि यस्य कस्यापि मर्त्यस्य सपिंडीकरणे तथा कृतोद्वाहोऽपि कुर्वीत पिंडनिर्वपणं सदेति अपिंडके स्वधाकारं च

न माधितिविद्धं गोगजाश्वादिपृष्ठेषु कृत्रिमायां तथा भुवि न कुर्याच्छ्राद्धमेतेषु पारक्यासु च भूमिषु कृत्रिमायां अट्टालिकासु परगृहेषु

परपरिगृहीतासु तास्वगोचारे मादयो न पुनस्तीर्थस्वामिनाम अधिकारी पितुः पुत्रेण कर्तव्यं पिंडदानोदकक्रियाः पुत्राभावे तु पत्नी

स्यात्तदपत्याभावे सहोदरः पुत्रग्रहणं पौत्रयोरुपलक्षणं विष्णुः पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसंततिः सपिंडसंततिर्वापि श्राद्धार्हाः

[illegible]

सूर्यग्रहो यदा रात्रौ दिवा चंद्रग्रहस्तदा तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचित् वेधः बालादि विषये मत्स्ये अपराह्णेन मध्याह्ने मध्या
ह्नेन तु संगवे भुंजीत संगवे चेत्स्यात् न पूर्वं भुक्तिमाचरेत् त्रयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवं मांगल्येषु समस्तेषु ग्रहणे चंद्र
सूर्ययोः अन्यत्रापि द्वादश्यादिस्तृतीयांतो वेध इंदुग्रहे स्मृतः एकादश्यादितः सौरे चतुर्थ्यंतः प्रकीर्तितः इदं संपूर्णग्रहे
खंडग्रहे तु उभयोर्दिनत्रयं सायाह्ने ग्रहणं चेत्स्यादपराह्ने न भोजनं अपराह्णे न मध्याह्ने मध्याह्नेन तु संगवे इति मार्कंडेयः
माघे संकल्पः माघमासमिमं पूर्णं स्नास्येऽहं देव माधव तीर्थस्यास्मिन् जले नित्यमिति संकल्प्य चेतसि स्नानमंत्रः पद्मपुराणे दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय
च प्रातःस्नानं करोम्यद्य माघे पापविनाशनं मकरस्थे रवौ माघे गोविंदाच्युत माधव स्नानेनानेन मे देव यथोक्तफलदो भव इति मंत्रं समुच्चार्य स्नायान्मौनसमन्वितः सवित्रे प्रसवि
त्रे च परं धामजले मम त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा सूर्यार्घ्यदानं मासावधि नसंभवेच्चेत् कर्तव्यं प्रयोगमाघमासे तु त्र्यहं स्नानस्य यत्सुकं अशक्या हि दिवादद्यात् ति
लाः शर्करया त्रितयं माघावसाने सुभगो षट्त्रिंशद्भोजनं तथा सार्धं मे प्रीयतां देवो विष्णुमूर्तिर्निरंजनः भागत्रयं तिलानां तु चतुर्थं शर्करांशकं सार्षपं गंधतैलं च यत्तैलं
पुष्पवासितं अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन निषिद्धतिथिष्वपि शुभवासरयोगे तैलस्नानं कार्यं तिथ्यपेक्षया वारस्य प्राबल्यात् [illegible] आवर्तनेयदा
संधिः पर्वप्रतिपदोर्भवेत् तदहर्याग इष्येत परतश्चेत्परेऽहनि पर्वप्रतिपदोः संधिरह्नो वा गावर्तनात् यदि तस्मिन्नहनि यष्टव्यं पूर्वेद्युः सदुपक्रमः आवर्तनात्स संधिर्यदि तस्मिन्नस्मि
न्नः परेद्युरिष्टिरिति एषः पर्वह्रासविनिश्चयः आवर्तनं दिनमध्यं अत्र पर्वापेक्षया यावती प्रतिपदो वृद्धिर्क्षयो वा तदर्धमानेन पर्वणो वृद्धिं ह्रासं वा कल्पयित्वा संधिर्निर्णयः
कात्यायनः परेद्युर्घटिकान्यूना तथैवाप्यधिका श्रयाः तदर्धं कृत्वा पूर्वस्मिन् ह्रासवृद्धी प्रकल्पयेत् अत्र केचित् यदि चतुर्दशी दशदंडा पर्व च पंचदशदंडमितं
प्रतिपत्तु एकोनविंशद्दंडा तदा प्रतिपद्वृद्धेरर्धं दंडद्वयं पर्वणि ते प्रक्षिपंति एवं चतुर्दशी यदि पंचविंशतिदंडा पर्व एकोनविंशद्दंड प्रतिपच्चतुर्दशदंडा तदा प्रतिप
द्ध्रासार्धं घटीद्वयं पर्वणि ते प्रक्षिपंति तदयुक्तं ईदृशे विषये पर्वापेक्षया प्रतिपदो ह्रासस्य वृद्धेर्वा भावात् प्रत्युत तद्वृध्युदाहरणे ह्रास एवास्ति ह्रासोदा
हरणे वृद्धिः नोदितघटिका न्यूनाधिक्यभावे ह्रासवृद्धी भवतः किंतु चतुर्दश्युत्तरं यावत्यः पर्वघटिकास्तत आधिक्यं न्यूनत्वं वा प्रतिपदो ह्रासवृद्धी इति खलु
संधिर्यत्रापराह्णे स्यात् याग प्रातः परेऽहनि कुर्वाणः प्रतिपद्योगे चतुर्थे विनश्यति नयं [illegible] चतुर्थे शे इति निषेधः न स्यात् तदा गौणकालस्यैवाधिकः अन्यत्राप्यः

[illegible]

उत्संनवं धवे प्रेते पिता भ्राताथवाग्रजः जननी चापि संस्कुर्यात् न मत्तो नान्यथा भवेत् इत्युक्रमेण विवक्षितः अपुत्रायाः पतिर्दद्यात् पुत्राया
न तु कुत्रचित् न पुत्रस्य पिता दद्यान्नानुजस्य तथाग्रजः अपि स्नेहेन कुर्यात्तां सपिंडीकरणं विना गयायां तु विशेषेण ज्यायानपि समाचरेत्
पत्नी भ्राता च तत्सुतः पिता माता स्नुषा तथा भगिनी भागिनेयश्च सपिंडः सोदकस्तथा असंनिधाने पूर्वेषां उत्तरे पिंडदाः स्मृताः तथा भगिन्या
विशेषः कात्यायनेनोक्तः मार्कंडेये स्वबंधुः सत्कृतः बंधुश्च सखा च श्वशुरस्य च जामाता स्नेहतः कुर्याद्दद्याद्वा पैतृमेधिकं यस्यार्थहरः स
पिंडदायीति विज्ञानेश्वरस्मरणात् अनुपनीतो औरसः प्रथमं पुत्रः भवेत् उपनीत एव मंत्राननुपनीतोपि पठेद्देवकः औरसः सुमंतुः
अनुपेतोपि कुर्वीत मंत्रवत्पितृमेधिकं यद्यसौ कृतचूडः स्याद्यदि स्यात् त्रिवत्सरः इति काश्यादिषु गयायां च प्रेतकार्यं तु यत्कृतं
सपिंडैरसपिंडैर्वा पुत्रैरेव कृतं भवेत् इत्यादीनि तान्यनाकरानि साकरत्वेपि तीर्थमेव प्रशस्तं न तु सपिंडीकरणं कर्तव्यमिदमेव परं श्रीकृ
ष्णादिस्तु पुत्रैरेव सपिंडीकरणं विधेयमिति जीवत्संन्यस्त पतित पितृकस्य तु दर्शश्राद्धाधिकारः तु नाद्धेन पितृदेवता एवैनं प्रसपदर्शयौ
जीवत्पितृकस्य मातरि मातामहे च मृतेपि नाप्येषां रूपितमातृमातामहयोः पार्वणप्राप्तिः किंतु पितृनिरूपितयोरेव पितामहे जीवति तन्निरू
पित एव देवताः पौत्रस्य पितृनिरूपितत्वं नि संबंधेन तदुच्चारणादेव प्राप्तिः पुत्राभावे तदैव श्राद्धाधिकारो विधवायाः अपुत्रा पु
त्रवत्पत्नी पुत्रकामं समाचरेत् पुत्रवदिति ना पुत्रकर्तृकश्राद्धे देवदेवता उद्देश्यत्वं तु पुत्रादीनां भर्तॄणां तन्माता महानां च पितृ
वादिना प्रतियेन रूपेणा संबंधिता तत्प्रति तेन रूपेणोद्देश्यत्वं अत एव स्मृतिदर्पणे स्वभर्तृप्रभृतित्रिभ्यः स्वभर्तृभ्यः स्वसा च
विधवा कुर्याच्छ्राद्धं यथाकालमतंद्रिता तथैव त्रिभ्य एवेत्यर्थः इदं च पञ्चदैवतं दर्शश्राद्धविषयं अत्र स्वपितृ पुत्रपौत्रत्वमेव तस्या
र्था इति तद्विवाहसीये तत्रापुत्राणामेवेति विशेषवचनाभावात् स्वपितृजीवति द्वारलोपान्नत्वावयावलोप एव मृतश्राद्धे तु श्राद्धे
पार्वणं कृतं इति न व देवत्वं देविस्मृतमातृकायाः स्वमात्रादिपार्वणमपीति द्वादशदैवतं मा कुं अपरे स्वमातामहपार्वणेन पंचदश

अतएवमाधवेनाप्युक्तं स्मृतिः पर्वणोंशेचतुर्थेतुकर्तव्येष्टिर्द्विजोत्तमैः द्वितीयासहितंयस्मात् इष्टयंस्याश्वलायनः इतिसंगच्छते इतिस
मर्थितत्वप्रतिपन्नधर्म एवनपर्वमध्ये प्रतिपच्चप्रविष्टायां यदिवेष्टिः समाप्यते पुनःप्रणीयदक्षिणेष्टिः कर्तव्यायोगवित्तमैः कात्यायनः
संधिश्चेत्संगवादूर्ध्वंप्राक्पर्यावर्तनाद्रवेः सापौर्णमासीविज्ञेया सद्यःकालविधौतिथिः आपस्तंबः पौर्णमास्यां अन्वाधानंयदि
द्वितीयरेणाप्युपवासः सद्योवासस्यकालेयासंवेक्ष्यते भाष्यार्थसंग्रहेतुपि अन्वाहितिश्वासावरणेणापवासःपूर्वेद्युरेतेखलु
पौर्णमास्या आवर्तनात्प्राग्यदिपर्वसंधिस्तदेवयागःक्रियतेसमस्त इति मंडनइतिदिक्। आहिताग्नेःसर्वाधानी अनाहि
ताग्नेस्त्वर्धाधानी केवलस्मार्ताग्निमान्वाति सांप्रदायिकाः। कार्तिकेग्रहणंश्रेष्ठं गंगायमुनसंगमे मार्गेतुग्रहणंशोणे
देविकायांमहाफले पौषेतुनर्मदा पुण्यामाघेसंनिहिताशुभा फाल्गुनेवरुणाप्रोक्ता चैत्रेपुण्यासरस्वती वैशाखेतुम
हापुण्याचंद्रभागासरिद्वरा ज्येष्ठेतुकौशिकीपुण्याआषाढेतापिकानदी श्रावणेसिंधुनामातु तथाभाद्रेतुचांद्रकाआ
श्विनेशरयूःश्रेष्ठातथापुण्यातुनर्मदा गोदावरीमहापुण्याकेदाराद्युसमन्विते सूर्येचराहुणाग्रस्ते तमोभूतेमहाफले
नर्मदातोयसंस्पर्शकृतकृत्याभवंतिते सर्वस्वेनापिकर्तव्यंश्राद्धंवैराहुदर्शने अकुर्वाणस्तुनास्तिक्यात्पंकेगौरिव
सीदति अकरणेदोषः आपस्तंबःप्रोक्तं तीर्थेचचंद्रसूर्यग्रहेतथा आमश्राद्धंद्विजः कुर्यात् हेमश्राद्धंतुदैवाहि सर्वंगंगासमं
तोयं सर्वेव्याससमाद्विजाः सर्वंभूमिसमंदानंग्रहणेचंद्रसूर्ययोः उष्णोदकमात्प्रविषयं ग्रहणेसंक्रमेचैवनस्नायाद्य
दिमानवः सप्तजन्मानिकुष्ठीस्याद्दुःखभागीचजायते। विमुक्तेयदिनस्नायात्चंद्रसूर्यग्रहेतथा तस्यतावदशौचंस्याद्यावद्
बौधायनः श्रोत्रियोऽश्रोत्रियोवापि पात्रंवापात्रमेववा विप्रब्रुवोपिवाविप्रो ग्रहणेदानमर्हति चंद्रसूर्योपरागेचयावद्दर्शनगो

वैश्वदेवमकृत्वैवश्राद्धंकुर्यादनग्निकः लौकिकाग्नेर्निवृत्तेशेषःपितॄणांनोपतिष्ठतीति वासिष्ठेविशेषविधानात् अथसाग्नेःलौगाक्षिः
पक्षांतंकर्मनिर्वर्त्य वैश्वदेवंचसाग्निकः पितृयज्ञंततःकुर्यात्ततोन्वाहार्यकंबुधः इतिपक्षांतंकर्मान्वाधानंएवं अन्वाहार्यंदर्शश्राद्धं
पक्षांतपिंडपितृयज्ञयोर्मध्यविधानादेववैश्वदेवस्यसाग्निककर्तृत्वावगमेवैयर्थ्यापातात् साग्निकग्रहणंऔपासनाग्निमतोनिवृत्त्यर्थं
इतिहेमाद्रिः उक्तरीत्यैवाविशेषेणश्रौतस्मार्ताग्निमतोरुभयोरपि वैश्वदेवकर्तृत्वावगमात् साग्निकपदस्यानुवादकत्वमेव नतुस्मार्ताग्निमन्नि
वर्तकत्वं श्रौताग्निमतएव अन्वाधानादीनांक्रमाकांक्षायांतन्मात्रमेवविधत्ते नकमपिपदार्थं तेनकदाचित् पितृयज्ञस्योत्तरकालेपि
नकश्चित्क्षतिः कचिच्छ्राद्धसाग्निकस्यापिपश्चादेववैश्वदेवः परिशिष्टे संक्रान्तेपार्वणश्राद्धएकोद्दिष्टेतथैवच अग्रतोवैश्वदेवस्यास
श्राद्धेकारेहनि शालंकायनः श्राद्धंतुप्रागेवकुर्वीत वैश्वदेवंचसाग्निकः एकादशाहिकंमुक्त्वा तत्रह्यंतेविधीयते तत्रानग्नेःश्राद्धशे
षेणवैश्वदेवः श्राद्धान्नेनतुवैश्वदेविकमनुश्राद्धंचरेद्धार्मिक इतिहेमाद्र्यादिलिखनात् यदिपृथक्पाकात् यदिवाश्राद्धशेषात्
वैश्वदेवःक्रियते उभयथापिभोजनंश्राद्धशेषस्यैव भुंजीतातिथिसंयुक्तः सर्वंपितृनिषेवितं पयोव्रतेप्राप्तस्येतिवत् मत्स्येतेपि
मीयंते स्वकलावृद्धिहानितः मासएतेस्मृतामासास्त्रिंशत्तिथिसमन्विताइतिसिद्धांतशिरोमणिवचनात् इत्युदितदर्शिताः अमाविषयः
पार्वणेचैकादशाद्वादशमुहूर्तौपितॄणांमुख्यकालस्तु नमुहूर्तत्रयस्य तत्रैवेकमन्येणएकदेशव्याप्तौस्मृत्यंतरे अपराह्णव्यापिन्यमावा
स्यायदाभवेत् तत्रास्तमहसाम्यांनिर्णयःपितृकर्मणि अधिकाराद्यार्थः एकदेशसमव्याप्तौ खर्वदर्पयोर्निर्णयः शिवराघवसंवा
दे अमावास्यातुयाहिस्यादपराह्णव्यापिसा क्षयेपूर्वापरायत्ता साम्येपिचपरास्मृता तिथिक्षयेसिनीवाली नष्टचंद्राकुहूर्मतादिनद्व
येकालव्याप्तौजाबालिः अपराह्णव्यापिनीयदिदर्शतिथिक्षये आहिताग्नेःसिनीवाली निरग्न्यादेःकुहूर्मता आदिशब्दात्
स्त्रीशूद्रयोरपिग्रहणं सिनीवालीद्विजैःकार्या साग्निकैःपितृकर्मणि स्त्रीभिःशूद्रैःकुहूःकार्या तथाचानग्निकैर्द्विजैः लौगा
क्षिवचनात् क्षयाहस्तुक्षयाहतिथियदाद्वौद्यापिदिनद्वये अपराह्णक्षमव्याप्तौ संपूर्णाभवतितदाक्षयेपूर्वावृद्धौपरातथा बौधायनः
अपराह्णद्वयव्यापिन्यतीतस्ययदातिथिः क्षयेपूर्वातुकर्तव्यावृद्धौकार्यातथोत्तरा अत्रक्षयवृद्धिरूपत्तरातिथिगतस्तेनद्व्येनग्राह्य

तिथिगताः

अमावास्यानिर्णयः त्रेधाविभक्तस्याह्नः स भाग एव प्रतीयते तथापि सायाह्नस्त्रिमुहूर्तः स्यात् श्राद्धं तत्र न कारयेत् राक्षसी नाम सा
प्रोक्ता गर्हिता सर्वकर्मसु इति यमः एकादशो द्वादशो मुहूर्त्तो यो कुतपस्तत्कालस्तु सिध्यति हेमाद्रिसिद्धांतः त्रिधांशतदिनस्यांते पराह्ने चेदिति
दीपिकायां सोपि एतत्सारतयैव व्याख्येयः माधवीयमपराह्न एवं अष्टमुहूर्त्तो स्यु कुतपे आरंभः नवमे रौहिणे समाप्तिरिति तु एकोद्दिष्ट
विषयं तेन कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत् विधिज्ञो विधिमास्थाय रौहिणं तु न लंघयेत् यत्तु नारदः मध्याह्ने त्रिमुहूर्तं तु यदा बलति भा
स्करः स कालः कुतपो नाम पितॄणां दत्तमक्षयं इति मुहूर्त्तत्रयात्मकं एकोद्दिष्टं तु मध्याह्ने आमश्राद्धकालः शातातपः आमश्राद्धं तु पूर्वाह्णे पराह्णे
पार्वणं भवेत् एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकं असंभवनिमित्तके आमश्राद्धं यत्कालः शूद्रं प्रति निषेधप्रोक्त स्मृत्यंतरे मध्याह्नात्परतो यस्तु कु
तपः स उदाहृतः आममात्रेण तत्रैव पितॄणां दत्तमक्षयं पाकाभावनिमित्तके शूद्राधिकारिके चामश्राद्धं प्रातर्मध्याह्नोत्तरकालयो विकल्पः केचित्
आमहेमपक्षयोः काकांतरे ब्राह्मपायदानं पेश्राद्धदिने उपवासे दोषश्रवणात् अदृष्टार्थं पुनः पत्रापि कार्यमेव स्विष्टकृद्भागइव शेषनाशिः आज्येन
यस्य सर्वाणि हवींषि न श्येयुः इव्येषु रपहरेयुर्वा आज्येनैता देवताः परिसंख्यायाय जेतीति वचनात् देवलः श्राद्धं कृत्वा तु यो विप्रो नीतुं तेप्रकल्प
बन देवाहव्यं नेगच्छति कव्यानि पितरस्तथा वैधोपवासप्राप्तो स्मृत्यंतरे उपवासोयदानित्यः श्राद्धे नैमित्तिकं भवेत् उपवासं तदा कुर्याद् घ्राय
पितृसेवितं अतः काम्योपवासप्राप्तावपि आघ्रेयमेव संकल्पितेप्रकारः संकल्पं तु यदा कुर्यान्न कुर्यात्सा त्रपूरणं नावाहनाग्नौकरणं पिंडश्रेयं
वनदापयेत् वैश्वदेवकालनिर्णयः अनन्ते स्कंदे ब्रह्मांडपुराणे वैश्वदेवाकुर्वीरग्नावर्वाग्ब्राह्मणभोजनात् गृहदत्ताद्भृतयज्ञादि
श्राद्धं कृत्वा ततः स्मृतं इसेककालः अर्वाक् ब्राह्मणभोजनात् इसेनेन अभ्यो कुरणानंतरं वैश्वदेवाकुर्वीत् कुर्यात् इति हेमाद्रिः द्वितीयो भविष्यपु
राणे पितृन्संतर्प्य विधिवद्बलिं दत्वा यथाविधानतः वैश्वदेवं ततः कुर्यात्पश्चाद्ब्राह्मणवाचनं बलिशेषदावृद्धं तु वैबो कः मे अग्निर्धान्यशांतिसंमेण
भक्ष्यो यत्नितस्त्रिपेद्बुधः आनीतं बलिं वीर श्राद्धकर्मणि सर्वदा तृतीयो पितृन्नेव कृत्वा श्राद्धं महाबाहो ब्राह्मणान्विसर्जयेत् वैश्व
देवादिकं कर्म ततः कुर्यान्नराधिप न च अग्निमदनाग्निमद्विषयं पक्षत्रयमपि भेष्यात् इति वाक्यं